No. २४४१ क

Title कुब्जिकातन्त्रे अस्त्रविधेयं प्रत्यङ्गिरामहामाला

Author

Extent १४ पत्र Age

Subject तन्त्र

नं. ८१

5900

३८३

F 14

ॐ
प्र॰
१

ॐश्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥ॐनमोमहा
कालिकाभगवत्यैनमः॥ॐअस्यश्रीप्रत्यंगिरामंत्रस्य
वामदेवऋषिः त्रिष्टुप्छंदः॥श्रीप्रत्यंगिरादेवता॥ममाभी
ष्टसिद्ध्यर्थेरणेशत्रुजयार्थेचजपेपाठेविनियोगः॥श्रीम
हादेवउवाच॥ॐमंदिरस्थंसुखासीनंभगवंतंमहेश्वरं॥स
मुपागम्यचरणौपार्वतीपर्य्यपृच्छत॥श्रीदेव्युवाच॥धारणी

शिव
१

यामहाविद्याप्रत्यंगिरामहोदया॥ नरनारीहितार्थाय वालानां
रक्षणाय च॥२॥राज्ञांमांडलिकानांचदीनानांचमहेश्वर॥ वि
दुषांचद्विजातीनांविशेषात्सर्वसाधिनी॥३॥महाभयेषुघोरेषु
विद्युदग्निभयेषु च॥व्याघ्रदंष्ट्रासुराघातेनदीनदसमुद्रके॥४॥अ
भिचारेषुसर्वेषुयुद्धेराजभयेषु च॥सौभाग्यजननीदेवीनृणांव
श्यकरीसदा॥ श्रीभैरवउवाच॥ साधुसाधुमहाभागेजंतूनांहि

+ शत्रूणां नाशिनीदेवी हृचिता न प्रकाशिता तां विद्यां भो महेश्वर कथयस्व मम प्रभो +
१

ॐ

प्र॰ २
2

नकारिणी ॥ नववाक्यात्सुरारिघ्नि कथयामि न संशयः ॥ ६ ॥ दे
वी श्रुत्वं गिरा विद्या सर्वग्रहनिवारिणी ॥ मर्दिनी सर्वदुष्टानां सर्व
पापप्रमोचिनी ॥ ७ ॥ स्त्रीबालप्रभृतीनां च जंतूनां हितकारिणी
सौभाग्यजननी देवी बलपुष्टिकरी सदा ॥ ८ ॥ चतुष्पदे दुर्गोष्ठेषु वने
ष्वुपवनेषु च ॥ श्मशाने दुर्गमे घोरे संग्रामे शत्रुसंकटे ॥ ९ ॥ राजद्वारे
षु दुर्भिक्षे महाभय उपस्थिते ॥ पठिता पाठिता देवी सर्वसिद्धिकरी स्मृ

शिव
२

ता॥ १०॥ विद्यास्तुचोत्तमाविंपदिताधारितासुरैः॥ लिखित्वा
भूर्जपत्रेचवाहौशिरसिधारयेत्॥ ११॥ विमुच्यतेमहाघोरैः मृ
त्युग्रहदुरासदैः॥ ग्रहाश्चैवात्रदुष्टाश्चदेवदानवपन्नगाः॥ १२॥
नतस्यपीडांकुर्वंतियेचान्येपीडकाग्रहाः॥ मंत्राद्याश्चाभिचा
राश्चनतस्यप्रभवंतिवै॥ १३॥ नित्यंधारयमानस्यसमृतत्वंप्र
कल्पते॥ १४॥ धारितावाचिताविद्यासर्वसिद्धिकरीस्मृता॥ यं

॰ योधारयेद्योगयुक्तसम्परदाभवेत्सदा

ॐ

प्र॰ ३

3

र्वांगस्यामहाविद्याप्रत्यंगिरामयोदिता ॥१५॥ सिद्धार्थासिद्धिदा
नित्यंविद्येयंपरमास्मृता ॥ नित्यंसिद्धिस्थिताविद्यानित्यंसिद्धिप्र
मास्थिता ॥१६॥ श्रीमताघोररूपेणरामाराधिताघोररूपिणी ॥ प्र
त्यंगिरामयाप्रोक्तारिपुहंत्रीनसंशयः ॥१७॥ हरिचंदनमिश्रेणगो
रोचनाकुंकुमेनच ॥ लिखित्वाभूर्जपत्रेतुधारणीयासदानरैः
॥१८॥ नखपुष्पैर्विचित्रैश्चवस्तुपहारपूजनैः ॥ पूजयेत्तुयथान्या

शिव ३

यंघातकुंभेनवेष्टितां ॥ १९ ॥ धारयेद्यइमांविद्यांनिश्चितांरिपुना
शिनीं ॥ विलयंयांतिरिपवः प्रत्यंगिरावधारणात् ॥ २० ॥ यंयंस्पृ
शतिहस्तेनयद्यत्स्वादतिजिह्वया ॥ अमृतंतद्भवेत्सर्वंनापमृत्युः
कदाचन ॥ २१ ॥ कर्मणायोजपेद्यस्तुकृत्रिमंचापियत्क्रियं ॥ भक्षितं
जरयत्याशुनरस्यतस्यसुव्रते ॥ २२ ॥ तथास्यांपठ्यमानायांजी
र्यंतेनात्रसंशयः ॥ मंत्रराजोह्ययंदेविसर्वसिद्धिकरः परः ॥ २३ ॥

ॐ

प्र० ४

सर्वतंत्रविनाशी च गोलकस्यांतरे स्थितः ॥ प्राप्नोति ... नितं
रिपुहस्तगतं श्रियं ॥ वश्यास्तस्यैव तिष्ठंति शात्रवः प्राणहारकाः
२५ ॥ भवंति वशगास्तस्य सुंदर्य्यः प्रियदर्शनाः ॥ ... वश्यतां
यांति सिद्धयोस्याः प्रसादतः ॥ २६ ॥ चराचरमिदं सर्वं सगोलचननका
ननं ॥ नरनारीसमाकीर्णं साधकस्य च सुव्रते ॥ २७ ॥ सर्वदा वश्य
तां यांति यजमानस्य नित्यशः ॥ गोलकस्य प्रभावेन प्रत्यंगिराप्र

भावनः ॥ २८ ॥ त्रिपुरश्च मयादग्धः स्मां विघांचविभ्रता ॥ निर्जि

ताश्चासुरांसर्वैर्दैवैर्विद्याभिमानिभिः ॥ २९ ॥ गोलकं संप्रवक्ष्यामि

कंडियारी ३ भैषज्यानिचसुव्रते ॥ क्रांनादमनकं चैवरोचनोकुंकुमं तथा ॥ ३० ॥ केसर ३

भिलावे ३ अरुष्करं चवाँरिष्टं सिद्धार्थं मालतीतथा ॥ एतद्द्रव्यगणं भद्रे गो

लमध्येनिधापयेत् ॥ ३१ ॥ संपुटं धारयेन्मंत्री साधको मंत्रवित्त

दा ॥ अधुनासंप्रवक्ष्यामिप्रत्यंगिरासुभाषितां ॥ ३२ ॥ दिव्यैर्मंत्रप

ॐ प्र॰ ५

दैश्चित्रैः सर्वोपायैः सर्वप्रदैः ॥ पठेद्दशांविधानेन मंत्रराजप्र
कीर्तितं ॥ ३३ ॥ ॐ अस्य श्रीप्रत्यंगिराभगवतीमालामंत्रस्य ब्र
ह्मविष्णुमहेश्वरा ऋषयः ॥ ऋग्यजुःसामानि छंदांसि ॥ महामा
यामहाविद्याभगवतीप्रत्यंगिरादेवता ॥ ह्रींबीजं ॥ श्रीं शक्तिः
हुं कीलकं ॥ सोमसूर्याग्नयस्तत्त्वानि ॥ पृथिवी पात्रं ॥ द्यौराच्छादनं
सर्वदेवतास्वरूपं ॥ परमात्मज्योतिः ॥ सर्वसिद्ध्यर्थे सर्वकार्यसा

शिव ५

धनेचविनियोगः॥ कृतांजलिःस्मृत्वान्यसेत्॥ अथऋष्या
दिन्यासः॥ ब्रह्मविष्णुमहेश्वरऋषिभ्योनमःशिरसि॥ ऋग्यजु
ःसामछंदोभ्योनमःमुखे॥ महामायामहाविद्याभगवतिमृत्यं
गिरादेवतायैनमःहृदि॥ ह्रींबीजायनमःगुह्ये॥ श्रींशक्तयेन
मःपादयोः॥ हुंकीलकायनमःनाभौ॥ सोमसूर्याग्नित्रयेभ्यो
नमःहृदि॥ पृथिवीपात्रायनमःनाभौ॥ घोराछादनायनमःशि

प्राव

ॐ
प्रं० ६
6

रसि ॥ सर्वदेवतास्वरूपपरमात्मज्योतिः सर्वसिद्ध्यर्थे सर्वकार्यसा
धने च विनियोगाय नमः ॥ सर्वांगेषु ॥ अथ करन्यासः ॥ हुं अंगु
ष्ठाभ्यां नमः ॥ हुं तर्जनीभ्यां स्वाहा ॥ हुं मध्यमाभ्यां वषट् ॥ हुं अनामि
काभ्यां हुं ॥ हुं कनिष्ठकाभ्यां वौषट् ॥ हुं करतलकरपृष्ठाभ्यां फट् ॥ इति
करन्यासः ॥ एवं हृदयादिन्यासः ॥ भूर्भुवः स्वरोमिति दिग्बंधः ॥ अथ
ध्यानं ॥ ॐ सिंहिं सिंहमुखी सखी भगवती ॥ श्रीशैलवत्योल्लसत्

शिव
६

शूलां शूलकपालपाशडमरून्व्यग्रायहस्तांबुजां ॥ दंष्ट्राकोटि
विशंकटास्यकुहरामारक्तनेत्रत्रयां ॥ बालेंदूज्ज्वलमौलिकांभ
गवतीं प्रत्यंगिरां भावयेत् ॥ ॐ वज्रं कपालं डमरुं त्रिशूलं संबिभ्र
तीचंद्रकलावतंसा ॥ पिंगोर्ध्वकेशी सितभीमदंष्ट्रा भूयाद्विभूत्यै
मम भद्रकाली ॥ १ ॥ इति ध्यानं ॥ अथ मूलमंत्रः ॥ ॐ नमः शि
वाय ॥ ॐ नमः सहस्रसूर्येक्षणाय ॥ ॐ नमो दिव्यरूपायगरुषा

ॐ
प्रं० ७

य॥ ॐ नमः पुरुहूताय पुरंदराय॥ ॐ नमो महासत्वाय॥ महामस्वाय॥ ॐ नमो व्यापिने॥ महेश्वराय॥ ॐ नमो जगच्छांतिकारिणे शांताय॥ ॐ नमः सर्वव्यापिने॥ महाघोरातिघोराय॥ ॐ नमः प्रभावं दर्शय २॥ ॐ ३॥ हिलि २॥ मिलि २॥ ॐ भूरि २॥ चिकि २॥ ॐ विद्युज्जिह्व मम शत्रून् ज्वल २॥ प्रज्वल २॥ बंध २॥ मथ २॥ प्रमथ २॥ प्रध्वंसय २॥ विनाशय २॥ ग्रस २॥ रुधिरं पिब २॥ नाशय २॥ भ्रा

शिव
७

मय २ ॥ द्रव २ ॥ द्रावय २ ॥ ताडय २ ॥ त्रासय २ ॥ विदारय २ ॥ म
मशत्रून्निमर्दय २ ॥ भक्षय ॥ ॐ भगवति त्वं मां साधकं सपरिवा
रकं रक्ष २ ॥ स्वाहा ॥ १८ ॥ ॐ ५ ॥ यं ५ ॥ रं ५ ॥ लं ५ ॥ वं ५ ॥ ॐ ५ ॥
सर्वभूतसर्वोपद्रवेभ्यो मां रक्ष २ ॥ स्वाहा ॥ ॐ महाभैरवघोरा ...
संवर्त्तकविद्युदर्कमूर्त्तिकपर्दिनि ॥ कुन्तधारिणि ॥ ... पा
शिनि ॥ वरकराम्भोरुहि ॥ विकटमालाधारिणि ॥ कुण्डलव्याघ्रा

ॐ
प्र
८
४

जिनि॥ कपर्दिनि॥ गजकांति॥ कपालकुण्डे॥ परमेश्वरप्रि
ये॥ ममशत्रून्छेदय२॥ भीषय२॥ भिंद्दि२॥ विदारय॥ देवपि
तृपिशाचासुर॥ उरग॥ गरुड॥ गंधर्व॥ नाग॥ किंनर॥ विद्याध
र॥ गण॥ यक्ष॥ राक्षस॥ गुह्यकां॥ लोकपालांश्च मालानय
मारय२ २॥ हन२॥ स्तंभय२ॐ॥ येचममसाधकस्यसपरिवारस्यशात्रव
स्थानिष्कांतय२॥ येसर्वदाममविघ्नाकर्मकुर्वंति॥ कारयंति।

शि
८

तेषांविद्यांस्तंभय२ ॥ स्थानंकीलय२ ॥ ग्रामंकीलय२ ॥ देशंघात
य२ ॥ ॐविश्वमूर्तिमहातेजसे ॥ ॐजुंसः३ ॥ ॐठः३ ॥ ॐहुं३ ॥ सः
ममशत्रूणांविद्यांस्तंभय२ ॥ ॐजः३ ॥ ॐठः३ ॥ ममशत्रूणांनेत्रेशि
रोमुखेकंठेहस्तौपादौगुह्यंइंद्रियाणिकुटुंबानि ॥ १ तन्स्थानानि
कीलय२ ॥ ॐजः२ ॥ ॐठः२ ॥ ममशत्रूणांमलदेशंघातय२ ॥ ॐ
सर्वसिद्धिमहाभागेममधारकस्यसाधकस्यसपरिवारस्यममशां

ॐ
प्र॰
५
१

निं कुरु२ कुरु२ स्वाहा ॥ ९८ ॥ ॐ जः२ ॥ ॐ ठः२ ॥ ॐ हुं२ ॥ स्वाहा फट्२ ॥ ॐ
प्रत्यंगिरे ॥ अमुकस्य साधकस्य ॥ सपरिवारस्य ॥ मम रक्षां कुरु२ ॥ स्वा
हा ॥ ॐ जः२ ॥ ॐ ठः२ ॥ ॐ हुं२ ॥ फट्२ स्वाहा ॥ ९८ ॥ ॐ नमो भगवति वे
तालिनि ॥ उग्रचांडालिनि ॥ त्रिशूलवज्रांकुशपाशशक्तिधारिणि ॥ रु
धिरमांसमधुमांसभक्षिणि ॥ कपालखट्वांगचर्मवज्रस्त्रधारिणि
मम साधकस्य शत्रून्दह२ ॥ छेदय२ ॥ हन२ ॥ मथ२ ॥ प्रमथ२ ॥ पि

शिव
८

व२॥ पच२॥ मर्दय२॥ तापय२॥ घोषय२॥ उत्सादय२॥ धम२॥
सर्वदुष्टांस्त्रासय२॥ ग्रासय२॥ पिव२॥ ॐ हूं हूं हूं दंष्ट्राकरालिनि
कौमारि॥ ममतंत्रयंत्रमंत्रविष॥ प्रधान्यस्त्रादिप्रभिचारसर्वोपद्र
वादिकं येन कृतं कारितं॥ कुरुते॥ कारयति॥ करिष्यति॥ [illegible]कारयं
ति॥ कारयिष्यंति वा तान्सर्वान्हन२॥ दुष्टधातुग्रहाद्याये[illegible]ह्ना
दयस्तथा॥ न तस्य पीडां कुर्वंति ये चान्ये पीडिकाग्रहा॥ मन्त्राद्याह्य

ॐ

प्र॰ १॰ भिचाराश्च ... प्रभवंतिच ॥ नित्यंधारयमाम्ले ... त्वं प्रक
ल्प्यते ॥ ॐ प्रत्यंगिरे मां सपरिवारकं रक्ष २ ॥ स्वाहा ॥ ॐ ऐं ॐ ह्रीं
ह्रौं हूं हूं फट् २ स्वाहा ॥ ॐ ऐं ह्रीं श्रीं स्क्रौं ह्रौं ब्रह्माणि मम शिरो रक्ष ॥ स्वा
हा ॥ ॐ ऐं ह्रीं श्रीं स्क्रौं ह्रौं वैष्णवी मम नेत्रे रक्ष २ ॥ स्वाहा ॥ ॐ ऐं ह्रीं श्रीं स्क्रौं
ह्रौं माहेश्वरि मम वक्त्रं रक्ष २ ॥ स्वाहा ॥ ॐ ऐं ह्रीं श्रीं स्क्रौं ह्रौं कौमारि मम
कंठं रक्ष २ स्वाहा ॥ ॐ ऐं ह्रीं श्रीं स्क्रौं ह्रौं इंद्राणि मम नाभिं रक्ष २ ॥ स्वाहा

ॐ ऐं ह्रीं श्रीं स्क्रौं ह्रौं नारसिंहि मम बाहू रक्ष २ स्वाहा ॥ २ ॥

ॐ ऐं ह्रीं श्रीं स्क्रौं ह्रौं वाराहि मम हृदयं रक्ष २ स्वाहा

शिव १०

ॐ ऐं ह्रीं श्रीं स्फ्रों ह्स्रौं चामुंडे मम गुह्यं रक्ष २ ॥ स्वाहा ॥ ॐ ऐं ह्रीं श्री
स्फ्रों ह्स्रौं चंडिके मम जंघे रक्ष २ ॥ स्वाहा ॥ ॐ ऐं ह्रीं श्रीं स्फ्रों ह्स्रौं वसुं
धरे मम पादौ रक्ष २ ॥ स्वाहा ॥ ॐ ऐं ह्रीं श्रीं स्फ्रों ह्स्रौं प्रत्यंगिरे मम स
र्वांगं रक्ष २ ॥ स्वाहा ॥ कुब्जिकास्या देवता दिक्षु विदिक्षु बीजपंचकं ॥ न
हूंकारे रमासमोपेतं रक्षयेत्साधकोत्तमं ॥ स्तंभिनी मोहिनी देव
क्षोभिनी [illegible] विसर्पिनी तथा ॥ जृंभिणी भ्रामिणी रौद्री संहारिणी विशो

ॐ

प्र०
११
नृ

शिराः॥ शाक्रयः क्रमयोगेन शत्रुपक्षेनियोजिताः॥ धारितासा
धकेदेशा॥ शत्रुपक्षविनाशिकाः॥ तद्यथा॥ ॐ स्तंभिनिस्फ्रौंस्फ्रों
ममशत्रून्स्तंभय२॥ ॐ मोहिनिस्फ्रौंस्फ्रोंममशत्रून्मोहय२॥ ॐ
क्षोभिणि स्फ्रौंस्फ्रोंममशत्रून्क्षोभय२॥ ॐ द्राविणिस्फ्रौंस्फ्रोंमम
शत्रून्द्रावय२॥ ॐ जृंभिणिस्फ्रौंस्फ्रोंममशत्रून्जृंभय२॥ ॐ भ्रा
मिणिस्फ्रौंस्फ्रोंममशत्रून्भ्रामय२॥ ॐ रौद्रिणिस्फ्रौंस्फ्रोंमम

शिव
११

शत्रून् रोडय २ ॥ ॐ संहारिणि स्फ्रों स्फ्रों मम शत्रून् संहारय २ ॥ ॐ
शोषिणि स्फ्रों स्फ्रों मम शत्रून् शोषय २ ॥ ॐ जुंसः ॥ ॐ ठः २ ॥ मम
शत्रूणां नेत्रे स्थंभय ॥ ॐ जः २ ॥ ॐ ठः २ ॥ मम शत्रूणां जिह्वां स्तंभ-
य २ ॥ ॐ जः २ ॥ ॐ ठः २ ॥ मम शत्रूणां हृदयं स्तंभय २ ॥ ॐ जः २ ॥ ॐ
ठः २ ॥ मम शत्रूणां गुह्यं स्तंभय २ ॥ ॐ जः २ ॥ ॐ ठः २ ॥ मम शत्रूणां
पादौ स्तंभय २ ॥ ॐ जः २ ॥ ॐ ठः २ ॥ मम शत्रूणां सर्वेंद्रियाणि स्तंभ

ॐ

प्र० यर॥ ॐजः२॥ ॐठः२॥ ममशत्रूणांकुडंवानिस्तंभय२॥ ॐजः२॥
१२ ॐठः२॥ ममशत्रूणांस्थानंकीलय२॥ ॐजः२॥ ॐठः२॥ ममश
12 त्रूणांमंडलंकीलय२॥ ॐजः२॥ ॐठः२॥ ममशत्रूणांदेशंकी
लय२॥ ॐसर्वसिद्धिमहाभागे॥ ममधारकस्य॥ सपरिवारस्य
रक्षांकुरु२॥ ॐहूंहूंहूंफट्स्वाहा॥ ॐप॥ यंप॥ ॐप॥ रंप॥ ॐप
लंप॥ ॐप॥ वंप॥ ॐप॥ ह्रींप॥ हूंप॥ फट्स्वाहा॥ ॐप्रत्यंगिरेम

स्वाहा १८ ॐ जः २ ॐ ठः २ ॐ घ्राः २ ॐ द्रौं २

मसाधकस्य॥ सर्वतः सर्वरक्ष २॥ ॐ क्लीं २॥ फट्स्वाहा॥ १८॥ एवं ध्या
त्वा जपेन्मंत्रं॥ एकविंशतिवासरे॥ शत्रूणां नाशनं ह्येतत्प्रकरोत्ययं
सुनिश्चितः॥ अष्टम्यां चार्धरात्रे तु शरत्काले महानिशि॥ यत्ना हि
ता च काले च तल्लग्नात्सिद्धिदा भवेत्॥ सर्वोपहारसंस्थाने वस्त्रर
त्नफलादिभिः॥ पुष्पैश्च रक्तवर्णैश्च साधयेत्कालिकां परां॥ वर्षाद्
र्ध्वमजमेषं मृगं वा च यथाविधि॥ दद्यात्पूर्वं महेशानि ततो जप्यं स

ॐ

प्र०
१२
12

मारभेत् ॥ अकस्मात्तस्यसिद्धिर्दाकालीसत्यंसत्यंवदाम्यहं ॥ १ ॥ एकायुतं
जपंकृत्वात्रिरात्रान्मरणांभवेत् ॥ महाज्वालाभवेत्तस्य तत्क्षणमात्र
शलाकिकां ॥ गुदद्वारेप्रविन्यस्यसद्योह्यात्मरणांरिपोः ॥ विद्यानाम
त्तमाविद्यापठितापाठितानरैः ॥ लिखित्वाचकंठेवाहौशिरसि
धारयेत्त् ॥ इमांयोधारयेद्दिव्यांत्रिसंध्यमपियःपठेत् ॥ सोपिदुःखां
तकोभूयात्कन्याच्छत्रून्नसंशयः ॥ सर्वलोकरक्षयेद्दिव्यांमहाभयाविप

शिव
१२

उ॰ प्र॰ १४ 14

न्निभु ॥ महाभयेषु घोरेषु न भयं विद्यते क्वचित् ॥ ॐ ३ ॥ हुं ३ ॥ प्रत्यंगि
रे स्फ्रें २ ॥ विकटदंष्ट्रे क्रीं २ ॥ कालि २ ॥ स्फ्रें २ ॥ हुंकारि रिरामम शत्रून् रुरु २
खादय २ ॥ सर्वदुष्टान्मारय २ ॥ खड्गेन छिंधि २ ॥ कि... ॥ पिव... ॥ ...धि
रं स्फ्रें २ ॥ कालि २ ॥ महाकालि २ ॥ ग्रां ह्रीं ह्रीं क्रीं हुं फट् स्वाहा ॥ ॐ क्रीं
अष्टोत्तरशतं मंत्रं जप्यं तेन प्रकीर्त्तितं ॥ इति श्रीकुब्जिकातंत्रे अ
स्त्रविद्येयं प्रत्यंगिरा महामाला समाप्ता ॥ शुभं सर्वजगतां ॥ ॥

शिव